# Vedamantramanjari 3

# वेदमन्त्रमञ्जरि - ३

## Document Information

Text title : veda mantra manjari - 3

File name : vedamantramanjari3.itx

Category : sUkta, veda, svara

Location : doc_veda

Transliterated by : Rekha Venkatesh

Proofread by : Rekha Venkatesh

Latest update : December 29, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 31, 2020

*sanskritdocuments.org*

# वेदमन्त्रमञ्जरि - ३

## ॥ श्रीगणेशसूक्तम् ॥

ऋग्वेदसंहिता मण्डल-८, अष्टक-६, सूक्त-८१

ॐ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ १ ॥ विद्मा
हि त्वा तुविकूर्मिन्तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः ॥ २ ॥ न हि त्वा शूर देवा
न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते ॥ ३ ॥ एतोन्विन्द्रं स्तवामेशानं वस्वः
स्वराजम् । न राधसा मर्धिषन्नः ॥ ४ ॥ प्र स्तोषदुप गासिषच्छ्रवत्साम गीयमानम्
। अभिराधसाजुगुरत् ॥ ५ ॥ आ नो भर दक्षिणेनाभि सव्येन प्र मृश । इन्द्र मानो
वसोर्निर्भाक् ॥ ६ ॥ उपक्रमस्वा भर धृषता धृष्णो जनानाम् । अदाशूष्टरस्य वेदः ॥
७ ॥ इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः । अस्माभिः सुतं सनुहि ॥
८ ॥ सद्योजुवस्ते वाजा अस्मभ्यम् विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ॥ ९ ॥ गणानां
त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ
नः शृण्वन्नूतिभिस्सीद सादनम् ॥ १० ॥ नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं
कवीनाम् । न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ ११ ॥ अभिख्यानो
मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनाम् । रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा
भजा राये अस्मान् ॥ १२ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ ऐकमत्य सूक्तम् ॥

ऋषिः संवननः आङ्गिरसः छन्दः अनुष्टुप् १,२,४ त्रिष्टुप् ३ देवता अग्निः १, सञ्ज्ञानम्
२-४

ॐ संस॒मिद्यु॑वसे वृष॒न्नग्ने॒ विश्वा᳚न्य॒र्य आ । इ॒ळस्प॒दे समि॑ध्यसे॒ स नो॒ वसू॒न्या भ॑र ॥ १ ॥ सं ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मनां᳚सि जानताम् । दे॒वा भा॒गं यथा॒ पूर्वे᳚ सञ्जाना॒ना उ॒पास॑ते ॥ २ ॥ स॒मा॒नो मन्त्र॒: समि॑तिः समा॒नी स॑मा॒नं मन॑: स॒ह चि॒त्तमे᳚षाम् । स॒मा॒नं मन्त्र॑म॒भि म᳚न्त्रये वः समा॒नेन॑ वो ह॒विषा᳚ जुहोमि ॥ ३ ॥ स॒मा॒नी व॒ आकू᳚तिः समा॒ना हृद॑यानि वः । स॒मा॒नम॑स्तु वो॒ मनो॒ यथा᳚ व॒: सुस॒हास॑ति ॥ ४ ॥

॥ ॐ शान्ति॒: शान्ति॒: शान्ति॑ः ॥

## ॥ श्रद्धा सूक्तम् ॥

ऋषिः श्रद्धा कामायनी छन्दः अनुष्टुप् देवता श्रद्धा देवी

ॐ श्र॒द्धया॒ग्निस्समि॑ध्यते । श्र॒द्धया॑ विन्दते ह॒विः । श्र॒द्धां भग॑स्य मू॒र्धनि॑ । वच॒सा वे॑दयामसि । प्रि॒यग्ग् श्र॑द्धे॒ दद॑तः । प्रि॒यग्ग् श्र॑द्धे॒ दिदा॑सतः । प्रि॒यं भो॒जेषु॒ यज्व॑सु । इ॒दं म॑ उदि॒तं कृ॑धि । यथा॑ दे॒वा असु॑रेषु । श्र॒द्धामु॒ग्रेषु॑ चक्रि॒रे । ए॒वं भो॒जेषु॒ यज्व॑सु । अ॒स्माक॑मुदि॒तं कृ॑धि । श्र॒द्धां दे॒वा यज॑मानाः । वा॒युगो॑पा॒ उपा॑सते । श्र॒द्धाग् हृ॑द॒य्य॑याऽकू᳚त्या । श्र॒द्धया॑ हूयते ह॒विः । श्र॒द्धां प्रा॒तर्ह॑वामहे । श्र॒द्धां म॒ध्यन्दि॑नं॒ परि॑ । श्र॒द्धाग् सूर्य॑स्य नि॒म्रुचि॑ । श्रद्धे॒ श्रद्धा॑पये॒ह मा᳚ । श्र॒द्धा दे॒वानधि॑वस्ते । श्र॒द्धा विश्व॑मि॒दं जग॑त् । श्र॒द्धां काम॑स्य मा॒तर᳚म् । ह॒विषा॑ वर्धयामसि ॥

॥ ॐ शान्ति॒: शान्ति॒: शान्ति॑ः ॥

## ॥ स्वस्तिनोमिमीतां सूक्तम् ॥

ऋग्वेद संहिताः मण्डल-५, अष्टक-४, सूक्त-५१ ऋषिः स्वस्त्यात्रेय छन्दः त्रिष्टुप् १,२,३ अनुष्टुप् ४,५ देवता विश्वेदेवताः

ॐ स्व॒स्ति नो᳚ मिमीताम॒श्विना॒ भग॑: स्व॒स्ति दे॒व्यदि॑तिरन॒र्वण॑: । स्व॒स्ति पू॒षा असु॑रो दधातु नः स्व॒स्ति द्यावा᳚पृथि॒वी सु॑चे॒तुना᳚ ॥ १ ॥ स्व॒स्तये᳚ वा॒युमुप॑ ब्रवामहै॒ सोमं᳚ स्व॒स्ति भुव॑नस्य॒ यस्पति॑: । बृह॒स्पतिं॒ सर्व॑गणं स्व॒स्तये᳚ स्व॒स्तय॑ आदि॒त्यासो᳚ भवन्तु नः ॥ २ ॥ विश्वे᳚ दे॒वा नो᳚ अ॒द्या स्व॒स्तये᳚ वैश्वान॒रो वसु॑र॒ग्निः स्व॒स्तये᳚ । दे॒वा अ॑वन्त्वृ॒भव॑: स्व॒स्तये᳚ स्व॒स्ति नो᳚ रु॒द्रः पा॒त्वंह॑सः ॥ ३ ॥ स्व॒स्ति मि॑त्रावरुणा स्व॒स्ति प॑थ्ये रेवति । स्व॒स्ति न॒ इन्द्र॑श्चा॒ग्निश्च॑ स्व॒स्ति नो᳚ अदिते कृधि ॥ ४ ॥ स्व॒स्ति पन्था॒मनु॑ चरेम सूर्याचन्द्र॒मसा᳚विव । पुन॒र्दद॒ताघ्न॑ता जान॒ता सङ्ग॑मेमहि ॥ ५ ॥

॥ ॐ शान्ति॒: शान्ति॒: शान्ति॑ः ॥

## ॥ वैदिक राष्ट्रगीता ॥

ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामास्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायातां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ तैत्तिरीय संहिता ७।५।१८ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ चतुर् वेदमन्त्राणि ॥

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥

इषे त्वोर्जेत्वा वायवस्थो पायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयख्ष्मामावस्तेन ईशत माऽघशग्ं सो रुद्रस्य हेतिः परिवो वृणक्तु ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥

अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सथ्सि बर्हिषि ॥

शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ वाक्सूक्तम् ॥

ॐ देवीं वाचमजनयन्त देवाः । तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना । धेनुर्वागस्मानुपसुष्टुतैतु । यद्वाग्वदन्त्यविचेतनानि । राष्ट्रीदेवानां निषसादमन्द्रा । चतस्र ऊर्जं दुदुहे पयाग्ंसी । क्वस्विदस्याः परमं जगाम । अनन्तामन्तादधि निर्मितां महीम् । यस्यां देवा अदधुर्भोजनानि । एकाख्षरां द्विपदाग्ं षट्पदां च । वाचं देवा उपजीवन्ति विश्वे । वाचं देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्याः । वाची मा विश्वा भुवनान्यर्पिता । सा नो हवं जुषतामिन्द्रपत्नी । वागख्षरं प्रथमजा ऋतस्य । वेदानां माताऽमृतस्य नाभिः । सा नो जुषाणोप यज्ञमागात् । अवन्ती देवी सुहवा मे अस्तु । या मृषयो मन्त्रकृतो मनीषिणः । अन्वैच्छन्देवास्तपसा श्रमेण । तां देवीं वाचग्ं हविषा यजामहे । सा नो दधातु सुकृतस्य लोके । चत्वारिवाक्परिमिता पदानि । तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति । तुरीयं वाचो मनुष्या वदन्ति ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

Encoded and proofread by Rekha Venkatesh

*Vedamantramanjari 3*

pdf was typeset on August 31, 2020

Please send corrections to *sanskrit@cheerful.com*